National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 260-266
© 2025 NJHSR
www.sanskritarticle.com

**सुष्मिता भट्टाचार्या**
शोधच्छात्रा, विद्यावारिधि (Ph.D.),
ज्योतिषशास्त्रे विभाग,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Correspondence:**
**सुष्मिता भट्टाचार्या**
शोधच्छात्रा,विद्यावारिधि (Ph.D.),
ज्योतिषशास्त्रे विभाग,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्याये प्रतिपादितस्य लग्नभावफलाध्यायस्य विमर्शः

सुष्मिता भट्टाचार्या

**सारांशः**

भारतीयज्योतिषपरम्परायां फलितज्योतिषस्य विशिष्टं स्थानम् अस्ति। तत्र महर्षिकश्यपप्रणीतं *कश्यपजातकम्* प्राचीनेषु प्रामाणिकेषु जातकग्रन्थेषु अन्यतमत्वेन परिगण्यते। अस्य ग्रन्थस्य तृतीयाध्याये प्रतिपादितः **लग्नभावफलाध्यायः** जातकफलनिर्णयस्य मूलाधाररूपेण प्रतिष्ठितः। अत्र लग्नभावस्य स्वरूपम्, ग्रहाणां द्वादशविधस्थितिजन्यफलानि, भावाधिपतेर्बलाबलम्, वर्गविचारः, नवांशविचारः च सूक्ष्मतया निरूपितानि सन्ति। प्रस्तुतलेखे तृतीयाध्याये प्रतिपादितानां सिद्धान्तानां शास्त्रीयः समीक्षात्मकः परिशीलनप्रयत्नः कृतः। अस्य अध्ययनस्य फलरूपेण ज्ञायते यत् महर्षिकश्यपेन ग्रहफलनिर्णये राशिस्थितिमात्रं नावलम्बितम्, अपितु वर्गबलम्, नवांशबलम्, भावेशबलम्, शुभाशुभसम्बन्धः, ग्रहस्वभावश्च सम्यगनुसन्धाय निर्णयः कृतः। एषा पद्धतिः भारतीयफलितज्योतिषस्य सूक्ष्मवैज्ञानिकदृष्टेः उत्कृष्टमुदाहरणमिति निष्पद्यते।

**प्रमुखशब्दाः—** कश्यपजातकम्, लग्नभावः, तनुभावः, वर्गविचारः, नवांशः, भावेशबलम्, फलितज्योतिषम्।

## प्रस्तावना

भारतीयविद्यापरम्परायां ज्योतिषशास्त्रं वेदाङ्गत्वेन प्रतिष्ठितम्। *"यथा शिखा मयूराणां नागानां मणयो यथा। तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम्॥"* इति प्रसिद्धवचनानुसारं ज्योतिषशास्त्रस्य सर्ववेदाङ्गेषु प्रमुखस्थानं प्रतिपाद्यते। ज्योतिषशास्त्रस्य सिद्धान्त-, संहिता-, होरा-स्कन्धभेदेन त्रिविधविभागः प्रसिद्धः। तेषु होरास्कन्धः जातकस्य शुभाशुभफलनिर्णयस्य प्रमुखाधारः। महर्षिपाराशर, वराहमिहिर, कल्याणवर्मा, वैद्यनाथ, गणेशदैवज्ञादिभिः एषः विषयः विविधदृष्टिभिः समुपवर्णितः। तेषामध्ये महर्षिकश्यपप्रणीतं *कश्यपजातकम्* प्राचीनपरम्परायाः प्रतिनिधिग्रन्थत्वेन विशेषमाहात्म्यमधिगच्छति।

कश्यपजातके ग्रहस्वरूपम्, राशिफलम्, भावफलम्, वर्गविचारः, नवांशफलम्, योगाः, दशाफलम् इत्यादयः विषयाः व्यवस्थिततया निरूपिताः। तत्र तृतीयाध्यायः **लग्नभावफलाध्यायः** सम्पूर्णजातकशास्त्रस्य मूलाधारभूतः। यतो हि जन्मसमये पूर्वदिग्भागे उदितो राशिभागः *लग्नम्* इति कथ्यते, तदेव तनुभावः, आत्मभावः, देहभावः इत्यपि प्रसिद्धम्। **तनुभावादेव** जातकस्य देहः, वर्णः, रूपम्, प्रकृतिः, आरोग्यम्, बलम्, यशः, स्वभावः, आयुः, जीवनप्रवृत्तिः, आत्मविश्वासः च ज्ञायन्ते। पराशराचार्येणापि तनुभावस्य विषयाः स्पष्टतया निरूपिताः। अतः सम्पूर्णजातकफलनिर्णयस्य प्रथमसोपानं लग्नभावस्य यथार्थपरिज्ञानमेव। महर्षिकश्यपस्य विशेषता तु अत्र दृश्यते यत् सः ग्रहफलनिर्णयं केवलं राशिस्थित्या न करोति, अपितु ग्रहस्य उच्चत्वम्, नीचत्वम्, नवांशस्थितिः, वर्गबलम्, वर्गोत्तमत्वम्, मित्रशत्रुराशिसम्बन्धः, भावाधिपतेर्बलम् इत्यादीनि सम्यगवलोक्य फलनिर्णयं विधत्ते। अयं दृष्टिकोणः परवर्तीषु होराग्रन्थेष्वपि प्रतिध्वनितो दृश्यते।

अतः प्रस्तुतशोधलेखस्य प्रयोजनं महर्षिकश्यपेन प्रतिपादितस्य लग्नभावविचारस्य शास्त्रीयमीमांसा कृत्वा तस्य फलितज्योतिषपरम्परायां विशिष्टस्थानस्य निर्धारणम् इति।

**लग्नभावस्य द्वादशविधफलनिर्णयस्य शास्त्रीयविमर्शः**

महर्षिकश्यपेन तृतीयाध्याये लग्नभावस्य फलनिर्णये विशिष्टा पद्धतिः प्रतिपादिता। सामान्यतः राशिस्थितिमात्रमवलम्ब्य फलनिर्णयो न करणीयः, अपितु ग्रहस्य उच्चत्वम्, नवांशस्थितिः, वर्गबलम्, मित्रशत्रुभावः, स्वक्षेत्रत्वम्, वर्गोत्तमत्वं चेति बहवः आधाराः समालोचनीयाः। एषा विचारपद्धतिः भारतीयफलितज्योतिषस्य सूक्ष्मदर्शितां प्रकाशयति।

**द्वादशविधफलनिर्णयस्य आधारः**

**स्वोच्चे स्वोच्च नवांशे च शुभ वर्गेऽथ नीचगे।**
**नीचांशे क्रूर षड्वर्गे मित्रगे सुहृदंशके ॥१॥**
**वर्गोत्तमेऽरिभेर्यंशे स्वर्क्षेद्वादशधा क्रमात् ।**
**फलञ्च तनुभावोत्थं कथ्यते च्यवनोदितम् ॥२॥[1]**

अत्र महर्षिकश्यपेन तनुभावस्थितग्रहस्य फलनिर्णये द्वादशविधानामवस्थानां निर्देशः कृतः। ग्रहः यदि उच्चराशौ वर्तते तर्हि तस्य स्वाभाविकबलं वृद्धिमधिगच्छति। उच्चनवांशस्थितिः सूक्ष्मबलस्य द्योतिका भवति। शुभवर्गप्राप्तौ ग्रहस्य फलप्रदानशक्तिः सम्यगभिवर्धते। अपरतः नीचराशिः, नीचांशः, क्रूरषड्वर्गः च ग्रहफलस्य अवरोधकत्वेन निर्दिष्टाः। मित्रराशिस्थितिः, मित्रनवांशः, वर्गोत्तमत्वं तथा स्वक्षेत्रस्थितिः ग्रहस्य स्थैर्यं, स्वाभाविकबलं च संवर्धयन्ति। शत्रुराशौ अथवा शत्रुनवांशे स्थितः ग्रहः स्वशक्तेः पूर्णाभिव्यक्तिं कर्तुं न समर्थो भवति। अतः ग्रहस्य फलनिर्णये राशिमात्रावलोकनं न पर्याप्तम्, अपितु वर्गादिसमग्रविचारः अपेक्षितः।

अस्य सिद्धान्तस्य वैशिष्ट्यमिदं यत् महर्षिकश्यपः फलनिर्णयं बहुआयामदृष्ट्या करोति। एषा पद्धतिः परवर्तिभिः होराचार्यैरपि बहुधा स्वीकृता दृश्यते। वर्गविचारस्य महत्त्वं ग्रहबलनिर्णये प्रधानतया स्वीक्रियते, यतो हि स्थूलराशिस्थितेः परं सूक्ष्मफलनिर्णयः नवांशादिवर्गैरेव सम्पद्यते।

अत्र "च्यवनोदितम्" इति पदेन ज्ञायते यदयं सिद्धान्तः प्राचीनर्षिपरम्परासमागतः, न केवलं कश्यपमुनिना नूतनतया कल्पितः। अतः कश्यपजातकं पूर्वाचार्यपरम्परायाः संवाहकग्रन्थ-त्वेनापि महत्त्वमधिगच्छति।

पराशर-वराहमिहिर-कल्याणवर्मादयः अपि ग्रहस्य उच्चत्वं, स्वक्षेत्रत्वं, मित्रक्षेत्रत्वं, वर्गबलं च फलनिर्णये महत्त्वपूर्णत्वेन स्वीकरोन्ति। तथापि महर्षिकश्यपस्य वैशिष्ट्यं द्वादशविधक्रमस्य स्पष्टनिरूपणम्। अयं क्रमः फलनिर्णये वैज्ञानिकसोपानरूपेण ग्राह्यः, यतः प्रत्येकावस्था ग्रहफलस्य गुणविशेषं परिवर्तयति।

अतः कश्यपमतानुसारं फलितज्योतिषे ग्रहस्य राशिस्थितिः प्रथमं साधनं भवति, किन्तु अन्तिमनिर्णयः वर्गबल-नवांश-भावेशबल-ग्रहसम्बन्धादीनां समन्वितविचारेणैव करणीयः। एष एव अस्याध्यायस्य मूलसिद्धान्तः।

द्वादशविधफलनिर्णयपद्धतिः कश्यपजातकस्य मौलिकेषु योगदानेषु अन्यतमा मन्यते। अस्याः पद्धतेः माध्यमेन ग्रहस्य स्थूलसूक्ष्मबलयोः समन्वितमूल्याङ्कनं शक्यते। अतः एषा केवलं पारम्परिकव्याख्या न, अपि तु फलितज्योतिषस्य विश्लेषणात्मकदृष्टेः प्रगल्भमुदाहरणम्।

**भावेशबलस्य फलनिर्णये प्रभावः**

लग्नभावविचारानन्तरं महर्षिकश्यपेन भावफलनिर्णये भावाधिपतेर्बलस्य निर्णायकस्थानं प्रतिपादितम्। अयं सिद्धान्तः केवलं लग्नभावे न, अपितु सर्वेषां द्वादशभावानामपि फलनिर्णये समानरूपेण प्रवर्तते। अतः भावस्य स्वरूपं, तत्र स्थितग्रहाः, दृष्टयः, योगाश्च यद्यपि विचारणीयाः, तथापि भावाधिपतेर्बलमेव फलसिद्धेः प्रमुखमाधारः।

**सफलं विफलं तच्च भावेशस्य बलाबलात् ।**
**क्रूरेण युज्यमानस्य विशेषाद्विफलं वदेत् ॥३॥**
**एवं शुभफलस्योक्तो निर्णयो भावनाथतः ।**
**अशुभस्य क्षयस्तस्मिन् सबलेऽपिबले चयः ॥४॥[2]**

अत्र "भावेशस्य बलाबलात्" इत्यनेन महर्षिकश्यपः स्पष्टतया प्रतिपादयति यत् भावफलस्य सिद्धिर्वा वैफल्यम्, उभयं भावाधिपतेर्बलमवलम्बते। यदि भावाधिपतिः स्वक्षेत्रे, उच्चराशौ, मित्रराशौ, शुभवर्गे, शुभदृष्टियुक्तो वा भवति, तर्हि तद्भावसम्बद्धफलानि पूर्णतया प्रकटन्ते। यदि पुनः स एव नीचराशौ, शत्रुराशौ, पापयुतः, पापदृष्टो वा निर्बलो भवति, तर्हि तद्भावस्य फलाभिव्यक्तिः बाध्यते।

"क्रूरेण युज्यमानस्य" इति पदेन पापग्रहसम्बन्धस्य विशेषदोषः सूचितः। केवलं निर्बलता न, अपितु पापग्रहयोगोऽपि भावफलस्य वैफल्यमधिकं जनयतीति महर्षिणः अभिप्रायः।

द्वितीयश्लोके शुभाशुभभावयोर्भेदः सूक्ष्मतया निरूपितः। शुभभावाधिपतिः सबलः चेत् शुभफलवृद्धिः; निर्बलः चेत् तस्य ह्रासः। अशुभभावाधिपतेः विषये तु विपरीतो नियमः—सबलत्वे तस्य अशुभफलप्राबल्यं, निर्बलत्वे तदशुभफलक्षयः। एषः सिद्धान्तः फलनिर्णये अत्यन्तमावश्यकः।

अस्य सिद्धान्तस्य मूलाधारः "बलमेव फलस्य कारणम्" इति। बलवतः ग्रहस्य कार्यसामर्थ्यं पूर्णं भवति, निर्बलस्य तु सीमितम्। अतः ग्रहस्य स्वाभाविकगुणाः सन्ति चेत् अपि, बलाभावे तेषामभिव्यक्तिर्न पूर्णतया सम्भवति। भावाधिपतेः सामर्थ्यं तद्भावस्य फलोत्पत्तौ निमित्तकारणत्वेन कार्यं करोति।

एवं दृष्टे सति ग्रहस्य नैसर्गिकशुभाशुभत्वमेकमेव निर्णायकं न भवति; अपितु स्थानबलम्, दिग्बलम्, कालबलम्, वर्गबलम्, दृष्टिसम्बन्धः, युतिश्च समन्वयेन विचारणीयाः। महर्षिकश्यपस्य एषा समन्वयप्रधानदृष्टिः परवर्तीषु होराग्रन्थेष्वपि प्रतिफलति।

भारतीयफलितज्योतिषपरम्परायां भावाधिपतेर्बलस्य महत्त्वं सर्वैराचार्यैः स्वीकृतम्। पराशराचार्यः, वराहमिहिरः, कल्याणवर्मा, वैद्यनाथश्च भावेशस्य शुभाशुभावस्थां फलनिर्णये प्रधानकारणत्वेन स्वीकुर्वन्ति। महर्षिकश्यपस्य वैशिष्ट्यं तु एतत् यत् सः अस्य सिद्धान्तस्य सामान्यनियमरूपेण प्रतिपादनं करोति, यस्य प्रयोगः सर्वेषु भावेषु समानरूपेण कर्तुं शक्यते।

भावाधिपतेर्बलनिर्णयः कश्यपमतस्य केन्द्रीयसिद्धान्तेषु अन्यतमः। तद्बलमेव भावस्य फलसिद्धेः प्रधानं निमित्तमिति अत्र निःसंशयं प्रतिपादितम्। अतः व्यवहारे जातकफलनिर्णयसमये भावं दृष्ट्वा तत्क्षणं निष्कर्षः न करणीयः; अपितु तस्य भावाधिपतेः

स्थितिः, बलम्, सम्बन्धाश्च सम्यगवलोकनीयाः। एषा पद्धतिः फलनिर्णयं अधिकं युक्तिसंगतं तथा शास्त्रसम्मतं करोति।

**लग्नस्थसूर्यस्य द्वादशविधफलविमर्शः**

महर्षिकश्यपेन ग्रहफलविवेचने प्रत्येकग्रहस्य लग्नस्थितेः द्वादश-विधानि फलानि निरूपितानि। एषा पद्धतिः फलितज्योतिषग्रन्थेषु विरलतया दृश्यते। सामान्यतया लग्नस्थसूर्यस्य फलमेकरूपेण वर्ण्यते, किन्तु महर्षिकश्यपः तदेव ग्रहफलं ग्रहस्य राशि-, नवांश-, वर्ग-, मित्रशत्रुभाव-, स्वक्षेत्र- तथा वर्गोत्तमावस्थाभेदेन पृथक् पृथक् निरूपयति। अयं दृष्टिकोणः अस्य ग्रन्थस्य मौलिकतां प्रकाशयति।

**तीव्रोदृढाङ्गो वह्वाशी रोगी लावण्यवर्जितः ।**
**अन्धो दीर्घोऽथ जटिलोऽधिकाङ्गो हीनकाङ्गकः ॥५॥[3]**
**दीनः स्यान्नीतिरहितः सूर्ये तनुगते क्रमात् ॥**

अत्र "क्रमात्" इति पदेन पूर्वोक्तद्वादशस्थितीनामनुक्रमः बोध्यते। अर्थात् स्वोच्चराशिस्थितः सूर्यः *तीव्रः* इति फलं ददाति; स्वोच्चनवांशस्थितः *दृढाङ्गः*; शुभवर्गस्थितः *बह्वाशी*; नीचराशिस्थितः *रोगी*; नीचनवांशस्थितः *लावण्यवर्जितः*; क्रूरषड्वर्गस्थितः *अन्धः*; मित्रराशिस्थितः *दीर्घः*; मित्रनवांशस्थितः *जटिलः*; वर्गोत्तमस्थितः *अधिकाङ्गः*; शत्रुराशिस्थितः *हीनकाङ्गकः*; शत्रुनवांशस्थितः *दीनः*; स्वक्षेत्रे स्थितः *नीतिरहितः* इति फलक्रमः अभिप्रेतः।

अत्र निर्दिष्टानि फलानि मुख्यतया देहसम्बद्धानि, यतो हि तनुभावः शरीरस्य, प्रकृतेः, रूपस्य, तेजसः च प्रतिनिधिः। सूर्यस्य नैसर्गिकस्वभावः उष्णः, तेजोमयः, पित्तप्रधानश्च। तस्मात् तस्य बलसम्पन्नावस्थासु देहबलस्य, प्रभावस्य, धैर्यस्य च वृद्धिः, निर्बलावस्थासु तु रोगप्रवणता, कान्तिहानिः, अवयववैषम्यं वा प्रतिपाद्यते। "लावण्यवर्जितः", "दीनः", "हीनकाङ्गकः" इत्यादीनि पदानि केवलं शारीरिकदोषान् न सूचयन्ति, अपितु सामाजिकप्रतिष्ठायाः, आत्मविश्वासस्य, व्यक्तित्वस्य च क्षयमपि व्यञ्जयन्ति। एवं "तीव्रः" इति पदं केवलं क्रूरतां न, अपि तु तेजस्वित्वं, पराक्रमं, साहसं, निर्णयशक्तिं च बोधयितुमर्हति। अतः फलनिर्णये पदानां यथार्थशास्त्रीयार्थः ग्राह्यः, न तु केवलं कोशार्थः।

महर्षिकश्यपस्य विवेचने सूर्यस्य फलं स्थिरं नास्ति; तद् ग्रहबलानुसारं परिवर्तते। अनेन स्पष्टं भवति यत् ग्रहस्य नैसर्गिकस्वभावः फलनिर्णयस्य केवलमेकः पक्षः, तस्य वास्तविकफलं तु स्थानविशेषेण, वर्गविशेषेण, सम्बन्धविशेषेण च परिवर्तते। अयं सिद्धान्तः सम्पूर्णफलितज्योतिषस्य मूलतत्त्वेषु गणनीयः।

सूर्यः आत्मकारकः, प्राणशक्तेः, अस्थिसारस्य, राजसत्तायाः, पितृकारकत्वस्य च प्रतिनिधिः। अतः लग्ने तस्य बलसम्पन्नावस्था जातकस्य व्यक्तित्वे, नेतृत्वे, आत्मबलसम्पत्तौ च विशेषप्रभावं जनयति। निर्बलावस्थासु तु तदेव सामर्थ्यं क्षीयते।

अत्र महर्षिकश्यपेन प्रतिपादितानि द्वादशफलानि मुख्यतया तनुभावप्रधानानि सन्ति। अन्येषु होराग्रन्थेषु लग्नस्थसूर्यस्य सामान्यफलमेव दृश्यते; किन्तु कश्यपः तेषां फलानां सूक्ष्मभेदान् वर्गस्थितेः आधारेण निरूपयति। अयं दृष्टिकोणः ग्रहफलनिर्णये अधिकवैज्ञानिकः तथा विश्लेषणप्रधानश्च मन्यते।

तस्मात् केवलं "लग्ने सूर्यः" इति ज्ञात्वा फलनिर्णयो न करणीयः; अपितु सूर्यस्य उच्चत्वम्, नवांशः, वर्गबलम्, भावाधिपत्यं, दृष्टयः, युतयः, दशा च सम्यगवलोकनीयाः। एतादृशः समन्वितः विचारः एव कश्यपमतस्य प्राणभूतः सिद्धान्तः।

लग्नस्थसूर्यस्य द्वादशविधफलविवेचनम् कश्यपजातकस्य विशिष्ट-वैशिष्ट्यम्। अनेन ग्रहफलनिर्णये सूक्ष्मवर्गविचारस्य अनिवार्यता सिद्ध्यति। अतः कश्यपमतानुसारं ग्रहस्य राशिस्थितिमात्रेण न, अपितु समग्रग्रहबलविचारेणैव यथार्थफलनिर्णयः साध्यः।

**लग्नस्थचन्द्रस्य द्वादशविधफलविमर्शः**

सूर्यविचारानन्तरं महर्षिकश्यपेन लग्नस्थचन्द्रस्य द्वादशविधानि फलानि प्रतिपादितानि। चन्द्रः मनसः, भावनानां, सौम्यतायाः, कान्तेः, मातृकारकत्वस्य, रसधातोः, जनप्रियतायाश्च कारकः परिगण्यते। अतः तनुभावे तस्य स्थितिः जातकस्य शारीरिकसौन्दर्ये, मानसिकप्रकृतौ, आचारे, सामाजिकव्यवहारे च प्रत्यक्षं प्रभावमावहति।

**पूर्णो मनोहरः स्वच्छः क्षीणो रात्र्यन्धतान्वितः ॥६॥**
**तिमिरांशोऽति सुभगः सुमुखो रम्यकेशकः ।**
**स्थूलास्यो दीर्घग्रीवो नासः शुभेष्टोऽब्जे तनुस्थिते ॥७॥[4]**

अत्रापि "क्रमात्" इत्यनुवर्तते। अतः पूर्वोक्तद्वादशस्थितयः अत्रापि ग्राह्याः। स्वोच्चस्थिते चन्द्रे जातकः **पूर्णः**, स्वोच्चनवांशे **मनोहरः**, शुभवर्गे **स्वच्छः**, नीचराशौ **क्षीणः**, नीचनवांशे **रात्र्यन्धतान्वितः**, क्रूरषड्वर्गे **तिमिरांशः**, मित्रराशौ **अतिसुभगः**, मित्रनवांशे **सुमुखः**, वर्गोत्तमे **रम्यकेशकः**, शत्रुराशौ **स्थूलास्यः**, शत्रुनवांशे **दीर्घग्रीवः**, स्वक्षेत्रे **शुभनासिकः** इति फलक्रमः बोध्यते।

महर्षिकश्यपस्य अयं विवेचनक्रमः सूचयति यत् चन्द्रस्य बलसम्पन्नावस्थासु शरीरस्य कान्तिः, मुखमाधुर्यम्, शीलसौम्यता, लोकप्रियता च अभिवर्धन्ते। निर्बलावस्थासु तु दृष्टिदोषः, दुर्बलता, देहवैषम्यं वा प्रादुर्भवति। अत्र प्रतिपादितानि फलानि केवलं शारीरिकलक्षणरूपेण न ग्राह्याणि, अपितु मानसिकप्रकृतेरपि द्योतकानि सन्ति।

चन्द्रस्य प्रकृतिः सौम्या, शीतला, स्निग्धा च। तस्मात् तस्य शुभबलसम्पन्नावस्था जातकस्य मनोवृत्तिं स्थिरां, विनीतां, लोकप्रियां च करोति। "मनोहरः", "सुभगः", "सुमुखः" इत्यादिपदानि रूपमात्रं न, अपि तु व्यक्तित्वस्य आकर्षणम्, व्यवहारमाधुर्यं, सामाजिक-स्वीकार्यता च बोधयन्ति।

"क्षीणः", "रात्र्यन्धतान्वितः", "तिमिरांशः" इत्यादिपदानि मानसिक-दुर्बलतां, निर्णयदौर्बल्यं, चित्तचाञ्चल्यं वा सूचयितुमपि शक्नुवन्ति। अतः फलनिर्णये शाब्दिकार्थमात्रं न स्वीकरणीयम्; ग्रहकारकतत्त्वेन सह तेषां समन्वितोऽर्थो विवेचनीयः।

महर्षिकश्यपस्य पद्धतौ चन्द्रफलनिर्णयः वर्गभेदाधारितः अस्ति। एतेन ज्ञायते यत् एकस्यैव ग्रहस्य फलं तस्य सूक्ष्मावस्थानुसारं भिन्नरूपेण प्रकटते। एषा विचारपद्धतिः सामान्यजातकग्रन्थेषु विरलतया दृश्यते। कश्यपः ग्रहस्य नैसर्गिककारकतां तथा तस्य स्थितिबलम् उभयं समन्वय्य फलनिर्णयं करोति।

फलितव्यवहारेऽपि यदि लग्ने चन्द्रः दृश्यते, तर्हि केवलं तेनैव शुभाशुभनिर्णयः न करणीयः। चन्द्रस्य पक्षबलम्, वर्गबलम्,

नवांशस्थितिः, दृष्टयः, युतयः, भावाधिपत्यं च सम्यगवलोकनीयम्। तदा एव यथार्थफलनिर्णयः सम्भवति।

महर्षिकश्यपेन प्रतिपादितं लग्नस्थचन्द्रस्य द्वादशविधफल-विवेचनं फलितज्योतिषे सूक्ष्मफलनिर्णयस्य उत्कृष्टमुदाहरणम्। अत्र चन्द्रस्य सौम्यस्वभावः तस्य बलानुसारं विविधरूपेण प्रकटते इति सिद्ध्यति। अतः वर्गबलं, नवांशबलं, भावाधिपतिबलं च विना चन्द्रफलनिर्णयः अपूर्ण एव मन्यते।

**लग्नस्थमङ्गलस्य द्वादशविधफलविमर्शः**

लग्नस्थग्रहाणां फलविचारे महर्षिकश्यपेन मङ्गलस्यापि द्वादशविधानि फलानि निरूपितानि। मङ्गलः नैसर्गिकपापग्रहत्वेन पराक्रमस्य, शौर्यस्य, रक्तधातोः, अग्नितत्त्वस्य, साहसस्य, युद्धकौशलस्य च कारकः परिगण्यते। तनुभावे तस्य स्थितिः जातकस्य शारीरिकरचना, नेत्रस्वास्थ्यं, धैर्यं, साहसं, क्रियाशीलता च विशेषरूपेण प्रभावितवती भवति।

**रक्तनेत्रो चिपिटदृक् कर्कशाक्षोऽन्धतायुतः ।**
**नक्तान्धस्तिमिरापेतो क्रूरदृक् स्थूललोचनः ॥८॥**
**नेत्ररोगी दूरदर्शी कुदृष्टिः सविधेक्षणः ।**
**जन्मान्धोऽदृक् फलं भौमे तनुभावस्थिते क्रमात् ॥९॥**[5]

अत्रापि "क्रमात्" इति पदेन पूर्वोक्तद्वादशावस्थाः एव विवक्षिताः। स्वोच्चस्थिते मङ्गले **रक्तनेत्रः**, स्वोच्चनवांशे **चिपिटदृक्**, शुभवर्गे **कर्कशाक्षः**, नीचराशौ **अन्धतायुतः**, नीचनवांशे **नक्तान्धः**, क्रूरषड्वर्गे **तिमिरापेतः**, मित्रराशौ **क्रूरदृक्**, मित्रनवांशे **स्थूललोचनः**, वर्गोत्तमे **नेत्ररोगी**, शत्रुराशौ **दूरदर्शी**, शत्रुनवांशे **कुदृष्टिः**, स्वक्षेत्रे **सविधेक्षणः** इति फलक्रमः ग्राह्यः।

एतेषु अधिकांशफलानि नेत्रसम्बद्धानि दृश्यन्ते। तस्य कारणं मङ्गलस्य अग्नितत्त्वप्रधानत्वम्। अग्नितत्त्वस्य अतिक्रमेण पित्तप्रकोपः, रक्तदोषः, नेत्रविकाराश्च सम्भवन्ति। अतः महर्षिकश्यपः मङ्गलस्य तनुभावस्थफलनिर्णये नेत्रलक्षणानां विशेषमुपादत्ते।

मङ्गलः केवलं पापग्रहः इति न मन्तव्यम्। सः साहसस्य, पराक्रमस्य, कार्यदक्षतायाः, नेतृत्वस्य, उत्साहस्य च प्रमुखः कारकः। अतः यदि सः स्वोच्चे, स्वक्षेत्रे, मित्रक्षेत्रे वा बलवान् भवति, तर्हि जातकः साहसी, शीघ्रनिर्णायकः, कर्मठः, संघर्षेष्वपि न विचलितः भवति।

परन्तु निर्बलावस्थासु अथवा पापसम्बन्धयुक्ते मङ्गले उग्रस्वभावः, शीघ्रकोपः, हिंसाप्रवृत्तिः, शारीरिकपीडा, रक्तसम्बद्ध-विकाराः, विशेषतः नेत्रदोषाश्च प्रादुर्भवन्ति। अतः महर्षिकश्यपेन निर्दिष्टानि शारीरिकलक्षणानि ग्रहकारकतत्त्वस्य प्रतीकात्मक-व्यञ्जनानि अपि सन्ति। "दूरदर्शी" इति पदं विशेषध्यानार्हम्। अस्य केवलं दीर्घदृष्टित्वमिति नार्थः, अपितु दूरदर्शित्वं, कार्यपरिणामानां पूर्वानुमानशक्तिः, रणनीतिकौशलं चेति व्यापकव्याख्यापि सम्भवति। एवमेव "कुदृष्टिः" इति पदं नेत्रदोषमेव न, अपितु दूषितदृष्टिकोणम्, असम्यग्विचारः, क्रूरमनोवृत्तिश्च बोधयितुमर्हति।

महर्षिकश्यपस्य मङ्गलफलविवेचने ग्रहस्य राशिबलस्य, वर्गबलस्य, नवांशबलस्य च प्रभावः स्पष्टतया दृश्यते। एक एव मङ्गलः सर्वेषां जातकानां समानं फलं न ददाति; अपितु तस्य सूक्ष्मावस्थानुसारं फलभेदः जायते। अयं सिद्धान्तः आधुनिकफलितविश्लेषणेऽपि ग्राह्यः।

अतः केवलं "लग्ने मङ्गलः" इति वाक्येन फलनिर्णयो न युक्तः। मङ्गलस्य बलम्, वर्गः, नवांशः, दृष्टयः, युतयः, भावाधिपत्यं, दशाकालश्च समन्वयेन विचारणीयाः। तदा एव तस्य यथार्थफलनिर्णयः शक्यते।

महर्षिकश्यपेन प्रतिपादितं लग्नस्थमङ्गलस्य द्वादशविध-फलविवेचनं ग्रहफलनिर्णये सूक्ष्मपद्धतेः उत्कृष्टमुदाहरणम्। एतेन सिद्ध्यति यत् ग्रहस्य नैसर्गिकस्वभावः, वर्गबलम्, नवांशबलम्, भावाधिपतिबलं च परस्परसमन्वयेन एव फलनिर्णयः करणीयः। अतः मङ्गलस्य तनुभावस्थफलानि शारीरिकानि, मानसिकानि, व्यवहारिकानि च सर्वाणि समन्वितरूपेण विवेचनीयानि।

**लग्नस्थबुधस्य द्वादशविधफलविमर्शः**

सूर्य-चन्द्र-मङ्गलानन्तरं महर्षिकश्यपेन लग्नस्थबुधस्य द्वादशविध-फलानि निरूपितानि। बुधः नैसर्गिकशुभग्रहः, बुद्धेः, वाग्वैदग्ध्यस्य, तर्कशक्तेः, स्मरणशक्तेः, लेखनकौशलस्य, गणनासामर्थ्यस्य, वाणिज्य-कौशलस्य च कारकत्वेन प्रसिद्धः। तनुभावे तस्य स्थितिः जातकस्य शारीरिकसौष्ठवं, वाक्प्रतिभां, व्यवहारकौशलं, बौद्धिकप्रगल्भतां च विशेषरूपेण प्रभावितवती भवति।

**सवक्रनासिकायुक्तः सुलम्बोष्ठस्तु कान्तिमान् ।**
**दुर्गन्धास्यो दीर्घजिह्नो दीर्घकर्णोऽसितालकः ॥१०॥**
**शुभकण्ठोऽति सुभगः करालश्चपलस्तथा ।**
**मेदोवृद्धियुतः पुष्टाङ्गो बुधे स्यात्तनुभावगे ॥११॥**[6]

अत्रापि पूर्वोक्तः द्वादशावस्थानां क्रमः अनुवर्तते। स्वोच्चस्थिते बुधे **सवक्रनासिकायुक्तः**, स्वोच्चनवांशे **सुलम्बोष्ठः**, शुभवर्गे **कान्तिमान्**, नीचराशौ **दुर्गन्धास्यः**, नीचनवांशे **दीर्घजिह्नः**, क्रूरषड्वर्गे **दीर्घकर्णः**, मित्रराशौ **असितालकः**, मित्रनवांशे **शुभकण्ठः**, वर्गोत्तमे **अतिसुभगः**, शत्रुराशौ **करालः**, शत्रुनवांशे **चपलः**, स्वक्षेत्रे **मेदोवृद्धियुतः पुष्टाङ्गः** इति फलक्रमः विवक्षितः।

महर्षिकश्यपः अत्र बुधस्य फलनिर्णये मुखमण्डलस्य, वाणीसम्बद्धा-वयवानां, शारीरिकसौष्ठवस्य च विशेषवर्णनं करोति। एतेन बुधस्य वागिन्द्रियसम्बन्धः, अभिव्यक्तिशक्तिः, सामाजिकव्यवहारः च सूचितो भवति।

बुधः स्वभावतः युक्तिप्रधानः, संवादशीलः, अनुकूलनकुशलश्च। अतः तस्य शुभबलसम्पन्नावस्थासु जातकः मनोज्ञवक्ता, मधुरभाषी, सुबुद्धिः, सम्यग्विवेकी, सौम्यव्यवहारी च भवति। "कान्तिमान्", "शुभकण्ठः", "अतिसुभगः", "पुष्टाङ्गः" इत्यादयः पदाः केवलं शारीरिकलक्षणानि न, अपि तु व्यक्तित्वस्य आकर्षणं, अभिव्यक्तिसामर्थ्यं, व्यवहारसौष्ठवं च व्यञ्जयन्ति।

अपरतः निर्बलावस्थासु "दुर्गन्धास्यः", "करालः", "चपलः" इत्यादिपदैः वाक्स्थैर्याभावः, निर्णयचाञ्चल्यम्, अस्थिरबुद्धिः, व्यवहारदौर्बल्यं वा सूच्यते। अतः बुधस्य फलनिर्णये बाह्यलक्षणैः सह अन्तःकरणस्य प्रवृत्तिरपि विवेचनीया।

महर्षिकश्यपस्य मतानुसारं बुधस्य फलं नितराम् अवस्थासापेक्षम्। यदि बुधः स्वक्षेत्रे, उच्चे, वर्गोत्तमे वा बलवान् भवति तर्हि तस्य नैसर्गिककारकतत्त्वानि पूर्णतया विकसितानि दृश्यन्ते। यदि

पुनः पापसम्बन्धेन वा निर्बलतया पीडितः भवति तर्हि बुद्धेः, वाचः, व्यवहारस्य च अवरोधः सम्भवति।

एषः सिद्धान्तः जातकविश्लेषणे महत्त्वपूर्णः, यतः आधुनिकव्याख्यानेषु बुधस्य फलं प्रायः बुद्धिमात्रे सीमितं निरूप्यते। महर्षिकश्यपः तु शरीरलक्षणानि, वाणी, सामाजिकस्वभावः, व्यक्तित्वविकासश्च बुधकारकत्वेन समन्वय्य विवेचयति।

लग्नस्थबुधस्य द्वादशविधफलवर्णनं कश्यपजातकस्य सूक्ष्मविश्लेषणात्मकपरम्परां प्रतिपादयति। बुधस्य बलसम्पन्नावस्थायां ज्ञानं, वाग्वैदग्ध्यं, सौन्दर्यं, व्यक्तित्वविकासश्च प्रबलतया दृश्यन्ते; निर्बलावस्थायां तु तेषां ह्रासः सम्भवति। अतः बुधफलनिर्णये राशिबलम्, नवांशबलम्, वर्गबलम्, भावाधिपत्यं, दृष्टयः, युतयश्च सम्यगवलोकनीयाः।

**लग्नस्थगुरोर्द्वादशविधफलविमर्शः**

महर्षिकश्यपेन बुधविचारानन्तरं लग्नस्थगुरोः फलानि निरूपितानि। गुरुर्नैसर्गिकशुभग्रहाणां श्रेष्ठतमः, धर्मस्य, ज्ञानस्य, प्रज्ञायाः, सदाचारस्य, पुत्रस्य, सौभाग्यस्य, दैवीसम्पदः च कारकः परिगण्यते। अतः तनुभावे तस्य स्थितिः जातकस्य शारीरिकसौष्ठवे, चारित्रिकमहत्त्वे, बौद्धिकविकासे, धार्मिकवृत्तौ च विशेषप्रभावं जनयति।

**सुन्दरः सुन्दरकरः सुकूर्च्चो रोगवर्जितः ।**
**सुज्ञः सुभूषः सद्वस्त्रः सुनाभिकटिसंयुतः ॥१२॥**
**शुभोरुः क्रोडरोगी च पाण्डुरोगसमन्वितः ।**
**सुलिङ्गतातिसौभाग्यसंयुतः तनुगे गुरौ ॥१३॥**[7]

अत्रापि पूर्वनिर्दिष्टः द्वादशविधक्रमः एव विवक्षितः। स्वोच्चस्थिते गुरौ जातकः **सुन्दरः**, स्वोच्चनवांशे **सुन्दरकरः**, शुभवर्गे **सुकूर्च्चः**, नीचराशौ **रोगवर्जितः**, नीचनवांशे **सुज्ञः**, क्रूरषड्वर्गे **सुभूषः**, मित्रराशौ **सद्वस्त्रः**, मित्रनवांशे **सुनाभिकटिसंयुतः**, वर्गोत्तमे **शुभोरुः**, शत्रुराशौ **क्रोडरोगी**, शत्रुनवांशे **पाण्डुरोगसमन्वितः**, स्वक्षेत्रे **सुलिङ्गतातिसौभाग्यसंयुतः** इति फलक्रमः ग्राह्यः।

महर्षिकश्यपस्य विवेचने गुरोः प्रभावः मुख्यतया देहसौन्दर्ये, आरोग्ये, ज्ञाने, शीले, सौभाग्ये च परिलक्षितः। अयं ग्रहः शुभत्वस्य परमप्रतिनिधित्वात् तनुभावे शुभलक्षणानामधिक्यं जनयति।

गुरोः नैसर्गिकस्वभावः सात्त्विकः, हितकारी, विस्तारप्रधानश्च। तेन बलसम्पन्नावस्थायां जातकस्य शारीरिकविकासः सम्यक् भवति, बुद्धिः प्रशस्ता भवति, धर्मनिष्ठा, विनयः, सदाचारः, गुरुभक्तिः, समाजसम्मानश्च अभिवर्धन्ते। "सुन्दरः", "सुज्ञः", "सुभूषः", "सद्वस्त्रः" इत्यादयः पदाः केवलं बाह्यरूपं न बोधयन्ति, अपितु आन्तरिकसंस्कारान्, सुसंस्कृतजीवनशैलीं, सद्वृत्तिं च द्योतयन्ति। "सुलिङ्गतातिसौभाग्यसंयुतः" इति पदेन शुभलक्षणयुक्तशरीरम्, सौभाग्यसम्पन्नजीवनं, मानमर्यादासम्पन्नव्यक्तित्वं च सूचितम्।

शत्रुक्षेत्रे अथवा निर्बलावस्थायां "क्रोडरोगी", "पाण्डुरोगसमन्वितः" इत्यादिभिः स्वास्थ्यहानिः, देहदौर्बल्यं, रसधातुविकारः वा व्यज्यते। अत्रापि महर्षिकश्यपः ग्रहस्य स्वभावं तस्य बलावस्थया सह समन्वय्य फलनिर्णयं करोति।

महर्षिकश्यपमतानुसारं गुरोः फलनिर्णये शुभग्रहत्वमात्रं निर्णायकं नास्ति। यदि गुरुर्निर्बलः, पापसम्बद्धः, शत्रुक्षेत्रस्थो वा भवति, तर्हि तस्य नैसर्गिकशुभत्वस्य पूर्णाभिव्यक्तिर्न भवति। विपरीततः बलसम्पन्नगुरौ तस्य सर्वे गुणाः प्रबलतया प्रकाशन्ते।

अतः फलितज्योतिषे "गुरुः शुभग्रहः" इत्येतावता निष्कर्षो न करणीयः। ग्रहस्य वर्गबलम्, नवांशः, भावाधिपत्यं, दृष्टयः, युतयः, दशाकालश्च सम्यगवलोक्य एव फलनिर्णयः कार्यः। एष एव महर्षिकश्यपस्य सूक्ष्मफलनिर्णयस्य आधारभूतः सिद्धान्तः।

लग्नस्थगुरोर्द्वादशविधफलविवेचनं महर्षिकश्यपस्य ग्रहफल-विश्लेषणकौशलस्य द्योतकम्। अत्र गुरोः शुभत्वं तस्य बलानुसारमेव फलप्रदं भवतीति स्पष्टतया प्रतिपादितम्। अतः गुरोः फलनिर्णये राशिबलं, वर्गबलं, नवांशबलं, भावाधिपतिबलं च समानरूपेण विचारणीयम्। एतेषां सम्यगनुसन्धानेनैव यथार्थजातकफलनिर्णयः सम्भवति।

**लग्नस्थशुक्रस्य द्वादशविधफलविमर्शः**

महर्षिकश्यपेन गुरोः फलविवेचनानन्तरं लग्नस्थशुक्रस्य द्वादशविधफलानि निरूपितानि। शुक्रः नैसर्गिकशुभग्रहः, सौन्दर्यस्य, कलानैपुण्यस्य, दाम्पत्यसौख्यस्य, भोगसम्पदः, वस्त्राभरणानां, सुगन्धस्य, विनयस्य, सौम्यव्यवहारस्य च प्रमुखकारकः। तनुभावे तस्य स्थितिः जातकस्य रूपसौन्दर्ये, व्यक्तित्वाकर्षणे, शारीरिक-कान्तौ, सामाजिकप्रतिष्ठायां च विशेषं प्रभावमावहति।

**चारुदेहो मनोज्ञाङ्गः स्निग्धगात्रः सुगन्धवान् ।**
**दुर्बलो मलिनो हीनः कृशगात्रोऽल्पतेजसः ॥१४॥**
**सुभगो रमणीयाक्षः प्रियवाग् मधुरस्वरः ।**
**स्थूलदेहोऽतिभोगी च शुक्रे तनुगते क्रमात् ॥१५॥**[8]

अत्रापि "क्रमात्" इति पदेन पूर्वोक्तः द्वादशावस्थानां क्रमः एव ग्राह्यः। स्वोच्चस्थिते शुक्रे जातकः **चारुदेहः**, स्वोच्चनवांशे **मनोज्ञाङ्गः**, शुभवर्गे **स्निग्धगात्रः**, नीचराशौ **सुगन्धवान्**, नीचनवांशे **दुर्बलः**, क्रूरषड्वर्गे **मलिनः**, मित्रराशौ **हीनः**, मित्रनवांशे **कृशगात्रः**, वर्गोत्तमे **अल्पतेजसः**, शत्रुराशौ **सुभगः**, शत्रुनवांशे **रमणीयाक्षः**, स्वक्षेत्रे **प्रियवाग् मधुरस्वरः स्थूलदेहोऽतिभोगी च** इति फलक्रमः बोध्यते।

अस्यां विवेचनपद्धतौ महर्षिकश्यपः शुक्रस्य प्रभावं मुख्यतया रूपे, देहकान्तौ, वाणीमाधुर्ये, सामाजिकव्यवहारे, भोगप्रवृत्तौ च निरूपयति। शुक्रस्य नैसर्गिकसौम्यत्वात् बलसम्पन्नावस्थासु आकर्षकव्यक्तित्वस्य, सौन्दर्यस्य, लोकानुरागस्य च वृद्धिः दृश्यते।

शुक्रः रसस्य, प्रेम्णः, कलायाः, सामञ्जस्यस्य च प्रतीकः। तस्मात् तस्य बलसम्पन्नावस्थायां जातकः केवलं रूपवान् एव न भवति, अपितु शिष्टाचारसम्पन्नः, कलाप्रियः, विनीतः, मधुरभाषी, समाजे प्रियश्च भवति। "चारुदेहः", "मनोज्ञाङ्गः", "सुभगः", "प्रियवाक्", "मधुरस्वरः" इत्यादयः पदाः बाह्यसौन्दर्यस्य सह आन्तरिकसौम्यभावस्यापि द्योतकानि सन्ति। एवं "अतिभोगी" इति पदेन केवलं भौतिकसुखासक्तिः न, अपितु विषयेषु अतिरुचिः, विलासप्रियता, इन्द्रियनिग्रहाभावः च बोध्यते।

निर्बलावस्थासु "दुर्बलः", "मलिनः", "कृशगात्रः", "अल्पतेजसः" इत्यादयः शब्दाः देहकान्तेः ह्रासं, उत्साहक्षयम्, व्यक्तित्वप्रभावस्य न्यूनतां च सूचयन्ति। अतः शुक्रफलविवेचने ग्रहस्य नैसर्गिकशुभत्वं तस्य वास्तविकबलानुसारमेव फलति।

महर्षिकश्यपस्य शुक्रविवेचनम् अत्यन्तं सूक्ष्मदर्शि। अत्र शुक्रस्य फलानि केवलं दाम्पत्यसौख्येन न सम्बद्धानि, अपितु शरीरलक्षणैः, वाणीगुणैः, सामाजिकव्यवहारेण, व्यक्तित्वेन च सह सम्बन्धितानि निरूपितानि। एतेन ज्ञायते यत् शुक्रकारकतत्त्वस्य व्यापकदृष्ट्या परीक्षणं कृतम्।

फलितव्यवहारे यदि शुक्रः लग्ने दृश्यते, तर्हि तस्य राशिस्थितिः, नवांशः, वर्गबलम्, दृष्टयः, युतयः, भावाधिपत्यं, दशाफलानि च सम्यगनुसन्धेयानि। एतेषां विना केवलं शुक्रस्थितिमवलम्ब्य फलनिर्णयः न युक्तः।

लग्नस्थशुक्रस्य द्वादशविधफलविवेचनम् महर्षिकश्यपस्य विश्लेषणपरम्परायाः उत्कृष्टं उदाहरणम्। अत्र शुक्रस्य सौन्दर्यकारकतत्त्वं, सामाजिकव्यक्तित्वनिर्माणे तस्य भूमिका, बलदौर्बल्यानुसारं फलभेदश्च स्पष्टतया प्रतिपादितः। अतः शुक्रफलनिर्णये वर्गबलम्, नवांशबलम्, ग्रहसम्बन्धाश्च अवश्यं विचारणीयाः।

**लग्नस्थशनेर्द्वादशविधफलविमर्शः**

महर्षिकश्यपेन शुक्रविचारानन्तरं लग्नस्थशनेः द्वादशविधानि फलानि प्रतिपादितानि। शनिर्नैसर्गिकपापग्रहः सन् आयुषः, कर्मणः, दुःखसहनशक्तेः, संयमस्य, वैराग्यस्य, न्यायस्य, विलम्बस्य च कारकः परिगण्यते। तनुभावे तस्य स्थितिः जातकस्य शरीररचना, वर्णः, स्वास्थ्यं, अस्थिसंस्थानं, जीवनदृष्टिः, कर्मनिष्ठा च विशेषतया प्रभावितवती भवति। महर्षिकश्यपः शनिफलविवेचनेऽपि पूर्ववत् द्वादशावस्थानां सूक्ष्मभेदमवलम्ब्य फलनिर्णयं करोति।

**श्यामवर्णो भिन्नवर्णो भिन्नाङ्गो भ्रमकाशवान् ।**
**कफानिलाढ्यः पित्ताढ्यो गौरः सततरोगास्थिवान् ॥१६॥**
**पीवरः स्थूलनखता सूक्ष्मताभ्यां समन्वितः ।**
**स्थूलदन्तो दीर्घजानुः शनौ स्यात्तनुभावगे ॥१७॥**[१]

अत्रापि "क्रमात्" इत्यर्थः पूर्वोक्तद्वादशस्थितिष्वनुवर्तते। तेन स्वोच्चस्थिते शनौ जातकः **श्यामवर्णः**, स्वोच्चनवांशे **भिन्नवर्णः**, शुभवर्गे **भिन्नाङ्गः**, नीचराशौ **भ्रमकाशवान्**, नीचनवांशे **कफानिलाढ्यः**, क्रूरषड्वर्गे **पित्ताढ्यः**, मित्रराशौ **गौरः**, मित्रनवांशे **सततरोगास्थिवान्**, वर्गोत्तमे **पीवरः**, शत्रुराशौ **स्थूलनखः**, शत्रुनवांशे **सूक्ष्मताभ्यां समन्वितः**, स्वक्षेत्रे **स्थूलदन्तः दीर्घजानुः** इति फलक्रमो बोध्यते।

महर्षिकश्यपः शनिग्रहस्य प्रभावं मुख्यतया शरीरस्य वर्णे, अस्थिसंस्थाने, धातुसाम्ये, रोगप्रवृत्तौ, देहसंरचने च निरूपयति। शनिः वातप्रधानग्रहत्वात् अस्थिधातोः, स्नायूनां, दीर्घकालिक-व्याधीनां च विशेषकारकः। अतः तनुभावस्थस्य शनिग्रहस्य फलानि प्रायः देहधर्मेषु स्पष्टतया दृश्यन्ते।

शनेः स्वभावः मन्दः, गम्भीरः, धैर्यप्रधानश्च। सः शीघ्रफलप्रदाता न भवति, किन्तु कालक्रमेण स्थिरं परिणामं ददाति। बलसम्पन्ने शनौ जातकः सहनशीलः, श्रमशीलः, कर्तव्यनिष्ठः, अनुशासितजीवन-परायणश्च भवति। तस्य जीवने यशः शनैः शनैरेव अभिवर्धते।

अत्र निर्दिष्टानि **श्यामवर्णः**, **गौरः**, **पीवरः**, **स्थूलदन्तः**, **दीर्घजानुः** इत्यादीनि पदानि देहवैशिष्ट्यस्य बोधकानि सन्ति। **कफानिलाढ्यः**, **पित्ताढ्यः**, **सततरोगास्थिवान्** इत्यादयः शब्दाः शरीरधातुसन्तुलनस्य अथवा तद्वैषम्यस्य सूचकाः। अतः एतानि फलानि चिकित्साज्योतिषदृष्ट्यापि महत्त्वपूर्णानि मन्यन्ते।

महर्षिकश्यपस्य शनिविवेचने विशेषतया द्रष्टव्यं यत् शनिः सर्वदा दुःखकारकः इति न स्वीक्रियते। ग्रहस्य फलं तस्य अवस्थाबले, वर्गबले, नवांशे, ग्रहसम्बन्धे, दृष्टिषु च आश्रितम्। यदि शनिर्बलवान् भवति तर्हि धैर्यं, संयमः, कर्मठता, दीर्घायुः, उत्तरदायित्वबुद्धिश्च प्रबलतया विकसिताः भवन्ति। यदि निर्बलः अथवा पापसम्बद्धः भवति तर्हि रोगप्रवणता, देहदौर्बल्यं, मानसिकक्लेशः, कर्मविघ्नाश्च सम्भवन्ति।

अयं दृष्टिकोणः कश्यपजातकस्य विशिष्टवैज्ञानिकतां प्रतिपादयति। फलनिर्णये केवलं शनिग्रहस्य नैसर्गिकपापत्वं न पर्याप्तम्; अपि तु ग्रहस्य समग्रबलविचारः अनिवार्यः।

लग्नस्थशनेः द्वादशविधफलवर्णनं महर्षिकश्यपस्य सूक्ष्मफलनिर्णय-परम्परायाः उत्कृष्टं निदर्शनम्। शनिग्रहस्य प्रभावः शरीरे, स्वास्थ्ये, कर्मप्रवृत्तौ, धैर्ये, जीवनानुभवे च गम्भीररूपेण प्रतिबिम्बितो भवति। अतः शनिफलनिर्णये राशिबलं, नवांशबलं, वर्गबलं, भावाधिपत्यं, दृष्टयः, युतयः, दशाफलानि च सम्यगनुसन्धेयानि। एतादृशसमन्वित-विचारेण एव महर्षिकश्यपप्रतिपादितस्य फलनिर्णयस्य यथार्थता अवगन्तुं शक्यते।

**समग्रसमीक्षा- लग्नभावफलाध्यायस्य शास्त्रीयमूल्याङ्कनम्**

महर्षिकश्यपप्रणीतस्य *कश्यपजातकस्य* तृतीयाध्याये प्रतिपादितः **लग्नभावफलाध्यायः** भारतीयफलितज्योतिषपरम्परायामत्यन्तं वैशिष्ट्यपूर्णं स्थानमधिगच्छति। अस्याध्यायस्य प्रमुखवैशिष्ट्यं नाम ग्रहस्य केवलं राशिस्थितिमवलम्ब्य न फलनिर्णयः, अपितु ग्रहस्य **स्वोच्चराशि, स्वोच्चनवांश, शुभवर्ग, नीचराशि, नीचनवांश, क्रूरषड्वर्ग, मित्रराशि, मित्रनवांश, वर्गोत्तम, शत्रुराशि, शत्रुनवांश तथा स्वक्षेत्र**—एतेषां द्वादशावस्थानामाधारेण पृथक् पृथक् फलविन्यासः।

एषा पद्धतिः फलितज्योतिषस्य सूक्ष्मविश्लेषणपरम्परायाः द्योतिका। सामान्यज्योतिषग्रन्थेषु बहुधा "लग्ने सूर्यः", "लग्ने चन्द्रः", "लग्ने शनिः" इत्यादिरूपेण सामान्यफलमेव प्रतिपाद्यते; किन्तु महर्षिकश्यपः ग्रहबलस्य, वर्गस्य, नवांशस्य च सूक्ष्मभेदानवलम्ब्य फलनिर्णयं करोति। अनेन जातकविश्लेषणे सूक्ष्मता, यथार्थता, वैज्ञानिकता च सम्यगुपलभ्यते।

अस्मिन्नध्याये सूर्यात् शनिपर्यन्तं सप्तग्रहाणां तनुभावस्थफलानि निरूपितानि। प्रत्येकस्य ग्रहस्य फलं तस्य नैसर्गिककारकतया सह अवस्थाबलेन संयोज्य प्रतिपादितम्। उदाहरणतया सूर्यस्य प्रभावः तेजसि, चन्द्रस्य मनसि, मङ्गलस्य पराक्रमे, बुधस्य बुद्धौ, गुरोः धर्मे, शुक्रस्य सौन्दर्ये, शनेः कर्मणि च आधृतः; तथापि महर्षिकश्यपः एतानि कारकतत्त्वानि वर्गभेदेन परिवर्तनीयानि मन्यते।

अध्ययनात् ज्ञायते यत् ग्रहस्य नैसर्गिकशुभत्वं वा पापत्वं वा फलनिर्णयस्य एकमेव कारणं नास्ति। ग्रहस्य वास्तविकफलं तस्य बलं, राशिः, नवांशः, वर्गः, ग्रहसम्बन्धः, दृष्टिः, भावाधिपत्यं, दशाकालश्च इत्यादीनां समन्वयेन एव निर्णीयते। अयं सिद्धान्तः फलितज्योतिषस्य वैज्ञानिकदृष्टिं दृढयति।

अस्याध्यायस्य अन्यदपि वैशिष्ट्यं देहलक्षणवर्णनम्। महर्षिकश्यपः केवलं भाग्यं, धनं, राज्यं वा न विवृणोति; अपि तु वर्णः, नेत्रम्,

मुखम्, नासिका, जिह्वा, कण्ठः, नखाः, अस्थयः, जानु, गात्रसौष्ठवं, आरोग्यं, रोगप्रवृत्तिः इत्यादीनि सूक्ष्मशारीरिकलक्षणानि प्रतिपादयति। अयं विषयः सामुद्रिकशास्त्रस्य तथा चिकित्सा-ज्योतिषस्यापि समीपवर्ती भवति।

तृतीयाध्यायस्य अध्ययनात् एतदपि स्पष्टं भवति यत् महर्षिकश्यपस्य फलनिर्णयपद्धतिः केवलं परम्परानुगता नास्ति, अपितु अनुभवाधिष्ठिता, परीक्षणपरकाच। ग्रहस्य प्रत्येकावस्थायाः पृथग्भूतफलनिर्देशः दीर्घकालीनज्योतिषानुभवस्य फलमेव इति मन्यते।

अतः *कश्यपजातकस्य* अयं लग्नभावफलाध्यायः आधुनिकफलितज्योतिषे पुनरध्ययनयोग्यः, अनुसन्धानयोग्यश्च अस्ति। विशेषतः वर्गाधारितफलनिर्णयस्य अयं सिद्धान्तः आधुनिक-ज्योतिषशोधेषु सांख्यिकपरीक्षणेन (Statistical Validation) परीक्षितुं शक्यते। यदि एतादृशानि अनुसन्धानानि क्रियेरन्, तर्हि महर्षिकश्यपस्य प्रतिपादितानां सिद्धान्तानां व्यवहारिकप्रामाण्य-मधिकं सुदृढं भविष्यति।

एवं दृष्ट्या तृतीयाध्यायः न केवलं प्राचीनफलितज्योतिषस्य प्रतिनिधिः, अपितु सूक्ष्मग्रहफलनिर्णयस्य आदर्शग्रन्थरूपेणापि परिगणनीयः।

**उपसंहारः**

महर्षिकश्यपप्रणीतस्य *कश्यपजातकस्य* तृतीयाध्याये प्रतिपादितस्य **लग्नभावफलाध्यायस्य** सम्यगध्ययनात् ज्ञायते यत् अयं अध्यायः भारतीयफलितज्योतिषपरम्परायामत्यन्तं महत्त्वपूर्णः तथा वैशिष्ट्यसम्पन्नश्च अस्ति। महर्षिकश्यपः ग्रहफलनिर्णये परम्परागत-रीतिमनुसृत्य केवलं ग्रहस्य राशिस्थितिमवलम्ब्य फलनिर्णयं न करोति, अपितु ग्रहस्य स्वोच्चराशि, स्वोच्चनवांश, शुभवर्ग, नीचराशि, नीचनवांश, क्रूरषड्वर्ग, मित्रराशि, मित्रनवांश, वर्गोत्तम, शत्रुराशि, शत्रुनवांश तथा स्वक्षेत्र—एतेषां द्वादशावस्थानामाधारेण सूक्ष्मतया फलभेदं प्रतिपादयति। अयं दृष्टिकोणः फलितज्योतिषस्य वैज्ञानिकपरम्परां सुदृढां करोति।

अध्ययनेन स्पष्टं भवति यत् ग्रहस्य नैसर्गिकशुभत्वं वा पापत्वं वा फलनिर्णयस्य केवलमेकं कारणं नास्ति। ग्रहस्य यथार्थफलं तस्य बलम्, वर्गः, नवांशः, ग्रहसम्बन्धः, दृष्टिः, भावाधिपत्यं, दशाकालः, अन्ययोगाश्च इत्यादीनां समन्वितविवेचनेनैव निश्चितुं शक्यते। एषः सिद्धान्तः महर्षिकश्यपस्य ग्रहफलविचारे मौलिकयोगदानरूपेण स्वीकर्तुं शक्यते।

अस्मिन् शोधे लग्नस्थसूर्यादारभ्य शनिपर्यन्तं सप्तग्रहाणां द्वादशविधफलानि क्रमशः विश्लेषितानि। तेषां विवेचनेन ज्ञायते यत् महर्षिकश्यपः शरीरलक्षणानि, मानसिकस्वभावम्, आरोग्यम्, सामाजिकव्यवहारम्, व्यक्तित्वविकासम्, धर्मबुद्धिम्, सौन्दर्यम्, कर्मनिष्ठां च समन्वयेन ग्रहफलनिर्णयं करोति। अतः कश्यपजातकस्य अयं अध्यायः केवलं जातकशास्त्रग्रन्थः न, अपितु मानवव्यक्तित्वस्य ज्योतिषीयविश्लेषणग्रन्थरूपेणापि द्रष्टव्यः।

अन्येषां होराग्रन्थानां तुलनात्मकदृष्ट्या अपि अस्याध्यायस्य वैशिष्ट्यमवगम्यते। यद्यपि बृहत्पाराशरहोराशास्त्रे, बृहत्जातके, सारावल्यां, फलदीपिकायां, जातकपारिजाते च लग्नस्थग्रहाणां फलानि निरूपितानि सन्ति, तथापि वर्गाधारितद्वादश-विधफलविन्यासः महर्षिकश्यपेन यथा सुव्यवस्थिततया प्रतिपादितः, तथा अन्यत्र विरलतया दृश्यते। अनेन *कश्यपजातकस्य* स्वतन्त्रं शास्त्रीयमहत्त्वं सुस्पष्टं भवति।

अस्मात् शोधात् एतदपि निष्पद्यते यत् आधुनिकफलितज्योतिषव्यवहारे केवलं राशिस्थितिमवलम्ब्य जातकफलनिर्णयः न करणीयः। ग्रहस्य नवांशः, वर्गबलम्, ग्रहबलम्, भावाधिपत्यं, ग्रहदृष्टयः, योगाः, दशाकालः इत्यादीनां समन्वित-विचारः अत्यावश्यकः। महर्षिकश्यपेन प्रतिपादितः अयं सिद्धान्तः आधुनिकज्योतिषपरामर्शे (Astrological Consultation) अपि समानरूपेण उपयोगी भवितुमर्हति। भविष्ये कश्यपजातकस्य अन्येषामध्यायानामपि समीक्षात्मकमध्ययनं, बृहत्पाराशरहोरा-शास्त्रादिग्रन्थैः सह तुलनात्मकपरीक्षणं, तथा आधुनिकसांख्यिकीय-पद्धत्या ग्रहफलानां प्रामाण्यपरीक्षणं (Statistical Validation) कर्तुं शक्यते। एतेन भारतीयफलितज्योतिषस्य प्राचीनसिद्धान्तानां व्यवहारिकप्रमाणिकता अधिकं सुदृढा भविष्यति।

अतः निष्कर्षतया वक्तुं शक्यते यत् महर्षिकश्यपप्रणीतस्य *कश्यपजातकस्य* तृतीयाध्याये प्रतिपादितः **लग्नभावफलाध्यायः** भारतीयफलितज्योतिषस्य सूक्ष्मफलनिर्णयपरम्परायाः उत्कृष्टः, मौलिकः, अनुसन्धानयोग्यश्च ग्रन्थांशः अस्ति। अस्य अध्ययनं प्राचीनज्योतिषपरम्परायाः पुनराविष्करणाय, आधुनिकफलित-ज्योतिषस्य परिष्काराय, भारतीयज्ञानपरम्परायाश्च संरक्षणाय महदुपकरोतीति निःसंशयं वक्तुं शक्यते।

**सन्दर्भग्रन्थसूची**

१. कश्यपजातकम्।
२. बृहत्पाराशरहोराशास्त्रम्।
३. बृहत्जातकम्।
४. सारावली।
५. फलदीपिका।
६. जातकपारिजातः।

**पाद टिप्पणी**

[1]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.1-2

[2] महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.3-4

[3]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.5

[4]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.6-7

[5]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.8-9

[6]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.10-11

[7]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.12-13

[8]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.14-15

[9]महर्षिकश्यपप्रणीतस्य कश्यपजातकस्य तृतीयाध्यायस्य श्लो.सं.16-17